किञ्चानेकधर्मान् वस्तु किमेकेन स्वभावेन नानास्वभावैर्वा व्याप्नुयादिति, यद्येकेन स्वभावेन तदा तेषामेकत्वं वस्तुनो वा नानात्वं स्यादेकस्यैकत्र(?) प्रवेशादिति । अथ नानास्वभावैस्तर्हि तानपि नानास्वभावान् किमेकेन स्वभावेन व्याप्नुयान्नानास्वभावैर्वा ? यद्येकेन तदा सर्वधर्माणामेकत्वं वस्तुनो वा नानात्वं स्यात्, अथ नानास्वभावैस्तर्हि तानपि किमेकेन स्वभावेन नानास्वभावैर्व्याप्नुयादित्यादि सर्वं वक्तव्यमनवस्था च ॥११॥

किञ्च, यदि सर्वं वस्तु अनेकान्तात्मकमभ्युपगम्यते, तर्हि जलादेरप्यनलादिरूपता, अनलादेर्वा जलादिरूपता भवेत्, तथा च जलाद्यर्थिनो जलादावनलाद्यर्थिनश्चानलादौ प्रवृत्तिर्न स्यात्, अन्योन्यविरुद्धस्यापि धर्मस्य सद्भावात् । को हि नाम विवक्षितार्थे विवक्षितार्थक्रियाकारिरूपमिवाऽ विविक्षितार्थक्रियाकारि-रूपमुपलभमानो विवक्षितार्थक्रियार्थी तत्र प्रवर्तेत, प्रेक्षापूर्वकारी न चैवं विवक्षितार्थे विवक्षितार्थक्रियाकारिण्येव

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विवक्षितार्थक्रियार्थिनां प्रवृत्तिर्दर्शनात् ॥१२॥

किञ्च, प्रमाणमप्यप्रमाणमप्रमाणं वा प्रमाणं वा भवेत्, तथा च सर्वजनप्रसिद्धप्रमाणाप्रमाणव्यवहारविलोपो भवेत् ॥१३॥

किञ्च, सर्वज्ञोऽप्यसर्वज्ञः स्यात् ॥१४॥

किञ्च, सिद्धस्यापि असिद्धत्वं स्यत् ॥१५॥

किञ्च, येन प्रमाणेन सर्वस्यानेकान्तरूपता प्रसाध्यते तस्य कुतोऽनेकान्तरूपता[९] सिद्धिर्यदि स्वतस्तर्हि सर्वस्यापि तथा भविष्यति किं प्रमाणपरिकल्पनया, अथ परतस्तर्ह्यनवस्था ॥१६॥

किञ्च, [१०]अनेकान्ते बाधकं प्रमाणमस्ति । तथा हि-भेदाभेदादिकौ धर्मौ नैकाधिकरणौ [११]परस्परविरुद्धधर्मिद्वयधर्मत्वात्, शीतोष्णस्पर्शवत् ॥१७॥ ॥६॥

तस्मादेकान्तरूपमेव वस्त्विति स्थितम् ॥१०॥

विरोधादीनाशङ्क्य तन्निराकुर्वन्नाह-

**द्वयं विरुद्धं नैकत्रासत्प्रमाणप्रसिद्धितः ।**
**विरुद्धवर्णयोगो हि दृष्टो मेचकवस्तुषु ॥ ७॥**

एकस्मिन् पृथ्वीपृथ्वीधरादौ वस्तुनि नित्यानित्यात्मकरूपं द्वयं न विरुद्धम् । न च विरोधोपलक्षितवैयधिकरण्यादिदोषकलुषम् । कथमिति चेदित्याह-असत्प्रमाणप्रसिद्धेः किमपि न तत्प्रमाणं प्रामाणिकम्मन्यैः प्रमाणीक्रियते, येन विरोधादीनां सिद्धिः साध्यते । तथा हि-यत्तावदुक्तं विरोधो बाधकः स्यादिति, तदयुक्तम्, पर्यायरूपतया भेदोऽभ्युपगम्यते द्रव्यरूपतया चाभेदस्तयोश्चैकत्र रूपरसयोरिव सत्त्वासत्त्वयोरिव वाऽविरोधसिद्धेः । प्रतीयमानयोश्च कथं विरोधो नाम ? स ह्यनुपलम्भसाध्यो, यथा वन्ध्या गर्भे स्तनन्धयस्य ।

ननु सत्त्वासत्त्वयोरेवेति दृष्टान्तोऽप्यसिद्ध इति चेत् ? तन्न, स्वद्रव्यक्षेत्रकालभावापेक्षया सत्त्वरूपस्य परद्रव्यक्षेत्रकालभावापेक्षया [१२]वाऽसत्त्वस्यैकस्मिन् क्षणे सर्वस्य पदार्थस्य प्रत्यक्षादिबुद्धौ प्रतिभासनात् । न खलु पदार्थस्य सर्वथा सत्त्वमेव स्वरूपम्, स्वरूपेणैव पररूपेणापि सत्त्वप्रसङ्गात् । नाप्यसत्त्वमेव, पररूपेणैव स्वरूपेणाप्यसत्त्वप्रसङ्गात् । न च स्वरूपेण सत्त्वमेव पररूपेणासत्त्वम्, पररूपेण वा ऽसत्त्वमेव स्वरूपेण सत्त्वम्, तदपेक्ष्यमाणनिमित्तभेदात् । स्वद्रव्यादिकं हि निमित्तमपेक्ष्य सत्त्वप्रत्ययं जनयति पदार्थः, परद्रव्यादिकं त्वपेक्ष्यासत्त्वप्रत्ययम्, इत्येकत्वद्वित्वादिसङ्ख्यावदेकस्मिन् पदार्थे सत्त्वासत्त्वयोर्भेदः । न चैकस्मिन् वस्तुनि वस्त्वन्तरमपेक्ष्य द्वित्वादिसङ्ख्या प्रकाशमाना स्वात्ममात्रापेक्ष्यैकत्वसङ्ख्यातो नाऽन्या प्रतीयते । नापि [१३]सा स्वरूपात्तद्वतो भिन्नैवास्याऽसङ्ख्येयत्वप्रसङ्गात् सङ्ख्यामेव नारोहतीति यावत् । सङ्ख्यासमवायात्तत्त्वमित्यप्ययुक्तम्, कथञ्चित्तादात्म्यव्यतिरेकेण समवायस्यासम्भवात् । तस्मात् सिद्धोऽपेक्षणीयभेदात् सङ्ख्यावत् सत्त्वासत्त्वयोर्भेदः ।

तथाभूतयोश्चानयोरेकस्मिन् पदार्थे प्रतीयमानत्वात् कथं विरोधो, यतो दृष्टान्तो न स्यात् । भ्रान्तेयं प्रतीतिरित्यपि मिथ्या, बाधकस्याविद्यमानत्वात्, [१४]विरोधो बाधक इति चेत् ? तदसत्यम्, इतरेतरा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्रयदोषानुषङ्गात् । सति हि विरोधे तेनास्या बाध्यमानत्वाद् भ्रान्तत्वम्, ततश्च तद् विरोधसिद्धिरिति । विरोधश्चाविकलकारणस्य भवतो द्वितीयसन्निधानेऽसत्त्वान्निश्चीयते । यथोष्णसन्निधाने शीतस्य । न च पर्यायरूपेण भेदस्य सन्निधाने द्रव्यरूपेणाभेदस्याऽभाव उपलभ्यते ।

किञ्चानयोर्विरोधः किं सहानवस्थानस्वभावः परस्परपरिहारस्थितिस्वभावो वध्यघातकस्वभावो वा ? तत्र न तावत्सहानवस्थानस्वभावो घटते, मृद्द्रव्यलक्षणे पदार्थे मृद्द्रव्यरूपतयाऽभेदस्य घटादिपर्यायरूपतया (च) भेदस्याध्यक्षबुद्धौ प्रतीयमानत्वात् । न च तथाप्रतीयमानयोरप्येकत्र तयोर्विरोधो युक्तः, रूपरसयोरपि तत्प्रसङ्गात् । परस्परपरिहारस्थितिस्वभावस्तु विरोधो घटादौ भेदाभेदयोः सत्त्वासत्त्वयोर्वा रूपरसयोरिव सतोरेव नासतोर्नापि सदसतोः सम्भवति । वध्यघातकस्वभावोऽपि विरोधोऽहिनकुलयोरिव बलवदबलवतोः, न च भेदाभेदयोः सत्त्वासत्त्वयोर्वा बलवदबलवद्भावो दृश्यते । न हि यथा नकुलेन बलवता सर्पस्य विघातः क्रियमाणो दृश्यते तथा भेदेनाभेदस्याभेदेने च भेदस्य विघातो दृश्यते, तथाप्रतीतेरभावात् ।

भवतु वा कश्चिद्विरोध इति, तथाप्यसौ सर्वथा कथञ्चिद्वा स्यात्, गत्यन्तराभावात् । न तावत्प्रथमपक्षो घटते । शीतोष्णस्पर्शयोपि प्रमेयत्वादिना विरोधसिद्धिः । एकाधारत्वेन चैकस्मिन्नपि हि धूपदहनादिभाजने क्वचित् प्रदेशे शीतस्पर्शः क्वचिच्चोष्णस्पर्शः प्रतीयत एव, [15]अनयोः प्रदेशयोर्भेद एवेष्यते । भवतु नामानयोर्भेदो धूपदहनाद्यवयविनस्तु भेदो, न चास्य शीतोष्णस्पर्शाधारता नास्तीति वक्तुं युक्तम्, अध्यक्ष-विरोधात् । तस्मान्न सर्वथा भावानां विरोधो घटते । कथञ्चिद्विरोधस्तु सर्वभावेषु तुल्यो न बाधकः ॥१॥

यच्चोक्तम्- वैयधिकरण्यं स्यादिति, तदप्यसत्यम्, [16]निर्बाधकप्रत्यक्षबुद्धौ भेदाभेदयोरेकाधि-करणत्वेन प्रतिभासनात् । न खलु प्रतीयमानयोर्वैयधिकरण्यम्, रूपरसयोरपि तत्प्रसङ्गात् ॥२॥

उभयदोषोऽपि न घटते, प्रतीयमाने कथमुभयदोषो नाम ? ॥३॥

नानादोषोऽपि न स्यात् । यथैव हि घटादौ भेदोऽनुभूयते तथाऽभेदोऽपीति कथं नानात्वदोषः ? अत एव सङ्करव्यतिकरावपि न स्तः, भेदाभेदयोरेकस्मिन् पदार्थे स्वरूपेण प्रतीयमानत्वात् ॥४॥

यच्चोक्तम्-अनवस्था स्यात् तदप्यनुपपन्नं, वस्तुन एव भेदाभेदात्मकत्वाभ्युपगमात् । न पुनर्भेदा-भेदयोधर्मयोः, पदार्थस्य तु भेदो धर्म एवाभेदस्तु धर्म्यैवेति कथमनवस्था ? न चैकान्ताभ्युपगमो दोषाय सम्यग्नयविषयस्य भेदस्याभेदस्य च स्याद्वादिभिरभ्युपगतत्वात् ॥५॥

संशयोऽपि न युक्तो भेदाभेदयोः स्वरूपेण प्रतीयमानत्वात्, एकस्मिन् भेदाभेदाप्रतीतौ हि संशयो युक्तः, क्वचित्प्रदेशे स्थाणुपुरुषत्वाप्रतीतौ तत्संशयवत् । चलिता च प्रतीतिः संशयो, न चेयं चलिता ॥६॥

तथा दृष्टहानिरदृष्टकल्पना च न स्यात्, भेदाभेदात्मकस्य वस्तुनः प्रत्यक्षादिप्रमाणबुद्धौ प्रतीयमानत्वात् ॥७॥

तत एवाभावोऽपि न युक्तः ॥८॥

यच्चोक्तम्-नानावस्तुधर्मापेक्षयोत्पादि तदसत्यं, न खलु नानावस्तुधर्मापेक्षया सर्वमनेकान्तात्मक-मङ्गीक्रियते येन सिद्धसाधनं स्यात् । अपि त्वेकस्यैव वस्तुनः स्वधर्मापेक्षया । न च तत्र विरोधादि-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दोषानुषङ्गस्तस्य प्रागेव निराकृतत्वात् ॥९॥

यच्चोक्तम्-क्रमेणेत्यादि, न तद्युक्तम् । क्रमेण चाक्रमेण चानेकान्तस्याभ्युपगतत्वात् । क्रमभाविधर्मापेक्षया हि क्रमेणाक्रमभाविधर्मापेक्षया चाक्रमेणेति ॥१०॥

यच्चोक्तम्-अनेकधर्मान् वस्तु किमेकेन स्वभावेन व्याप्नुयान्नानास्वभावैर्वेत्यादि, तत्र नैकेन स्वभावेन नानास्वभावैर्वा भिन्नवस्तु भिन्नान् स्वभावान् स्वतो व्याप्नुयादिति जैनो मन्यते । किं तर्हि स्वकारणकलापादनेकस्वभावात्मकं मतमिति ॥११॥

यच्चोक्तम्-जलादेरप्यनलादिरूपता स्यादित्यादि तदप्यनुपपन्नं, जलादेर्हि स्वरूपापेक्षया जलादिरूपता, न पररूपापेक्षया । ततो न जलादौ जलार्थिनोऽनलादिरूपस्य दर्शनं, यतस्तत्र प्रवृत्तिर्न स्यात्प्रेक्षापूर्वकारिण इति ॥१२॥

यच्चोक्तम्-प्रमाणमप्यप्रमाणं स्यादित्यादि तदपीष्टमेव, प्रमाणस्य स्वरूपापेक्षया प्रमाणरूपतायाः पररूपापेक्षया चाप्रमाणरूपतायाः स्याद्वादिनामिष्टत्वात् । ततो न लोकप्रसिद्धप्रमाणाप्रमाणव्यवहारविलोपः स्यात्, उक्तन्यायेन प्रमाणाप्रमाणव्यवहारस्य लोके प्रमाणेऽपि प्रसिद्धित्वादिति ॥१३॥

यच्चोक्तम् -सर्वज्ञोऽप्यसर्वज्ञः स्यादिति तदपीष्टमेव, असर्वज्ञरूपेण सर्वज्ञस्याप्यसर्वज्ञरूपताया [१७]अभ्युपगमात् इति प्रकारान्तरेण च तस्यासर्वज्ञता न सम्भवत्येवऽप्रमाणबाधनादिति ॥१४॥

यच्चोक्तम्-सिद्धोऽप्यसिद्धः स्यादित्यादि तदपीष्टमेव, पररूपापेक्षया सिद्धस्याप्यसिद्धरूपताया अभ्युपगतत्वादिति ॥१५॥

यच्चोक्तम्-येन प्रमाणेन सर्वस्यानेकान्तरूपता प्रसाध्यते तस्य कुतोऽनेकान्तरूपतासिद्धिः स्यादित्यादि, तत्रोच्यते—प्रमेयं हि द्विविधमचेतनं चेतनं च । तत्राचेतनं स्वपराध्यवसायविकलं न स्वस्यैकान्तरूपतामनेकान्तरूपतां च परिच्छेत्तुम् अलम् । चेतनेन तत्रानेकान्तरूपता परिच्छिद्यते । [१८]चेतनश्च स्वस्याप्यनेकान्तरूपतां परिच्छेदयितुं समर्थम्, न तत्तत्रापरं प्रमाणमपेक्ष्यते येनानवस्था स्यात् । तथा हि-चित्ररूपं वस्तु येन प्रत्यक्षेणानुमानेन वा परिच्छिद्यते तत्स्वरूपापेक्षयात्मनो भावं पररूपापेक्षया चाभावं परिच्छिनत्ति, अन्यथा यथावदसङ्कीर्णस्वरूपस्य ग्राहकं न स्यात्, न चैवं व्यावृत्ताव्यावृत्तस्वरूपस्य प्रमाणस्य सिद्धरूपत्वादिति । यस्य तु कस्यचित्तत्रापि स्वदुरागमाहितवासनावशादेकान्तसमारोपः सोऽपि तस्य नयान्तरान्निराकर्त्तव्यः[१९] । तथा हि- धूमादिलिङ्गस्य यथा स्वसाध्यं प्रति गमकत्वम्, तथा [२०]साध्यान्तरं प्रति विद्यते न वा ? यदि गमकत्वमेवाङ्गीक्रियते तदा साध्यान्तरस्यापि तत एव सिद्धेर्लिङ्गान्तरकल्पनावैफल्यं स्यात्, ततः सर्वस्यापि साध्यस्य सिद्धेरिति । उतान्यथा, तर्हि यथैकं लिङ्गं गमकत्वागमनकत्वरूपेणानेकान्तरूपम्, तथा सर्वं वस्तु स्वपरकरणसामर्थ्यनानेकान्तरूपमस्तु, विशेषाभावादिति ॥१६॥

यदप्युक्तम्-बाधकं प्रमाणमस्ति भेदाभेदौ न एकाधिकरणौ इत्यादि तदप्यनुपपन्नं, पक्षस्य प्रत्यक्षेण बाध्यमानत्वात् हेतोश्च कालात्ययापदिष्टत्वात् । अनुष्णोऽग्निर्द्रव्यत्वाज्जलवत् इत्यादिवत् । [२१]भेदाभेदयोरेकाधिकरणत्वेन प्रतिभासनात् न चोभयोर्विरुद्धधर्मयोरपि सतोः कापि क्षितिरीक्ष्यत इति पर्यालोच्य

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्तुतिकृदपि विरोधाभावमाहविरुद्धेत्यादि । हिर्यस्माद् विरुद्धवर्णसम्बन्धो मेचकवस्तुषु मिश्रवर्णपदार्थेषु दृष्टः, परं न तत्रैतद् दूषणकणघोषणान्वेषणापि कर्तुं पार्यते । यदि तत्रापि वाग्डिण्डिमाडम्बरप्रचण्डपाण्डित्य-पाटवनाट्यशीलैः प्रत्यक्षादिप्रमाणोपपन्नेऽपि अनेकान्ते कापि युक्तिः प्रपञ्च्यते, तदा एवमप्यस्तु । अनुष्णोऽग्निर्द्रव्यत्वात्, जलवत् । अथैतत्प्रत्यक्षबाधितपक्षानन्तरं निर्दिश्यमानत्वेन कालात्ययापदिष्टम्, आः परमबन्धो ! पीयूषयूषं पिब । वयमपि हस्तमुत्क्षिप्य एवमेव वदामो मेचकवस्तुवत् प्रत्यक्षोपपन्नेऽप्यनेकान्ते का कुयुक्तिनिरुक्तिप्रपञ्चचातुरी ? तस्माद् विरोधादिदूषणवारणगणाधर्षणीयः परां प्रौढिरूढिं प्रपन्नोऽनेकान्त-केसरी ॥१७॥ ॥७॥

ननु भोः सभ्याः ! निभालयन्तु कौतुकम् । एते बौद्धादयः स्वयमभ्युपगम्यापि स्याद्वादं निराकुर्वन्तः किं न कुर्वन्ति स्वाधिरूढशाखामोटनन्यायम् ? एतदेव पराभ्युपगतानेकान्तवादसंवादद्वारेण दृष्टान्तयुक्त्या स्पष्टयन्नाह-

**विज्ञानस्यैकमाकारं नानाकारकरम्बितम् ।**
**इच्छंस्ताथागतः प्राज्ञो नानेकान्तं प्रतिक्षिपेत् ॥८॥**

विज्ञानस्य संविद एकमेव स्वरूपं नानाचित्रपटाद्यनेकाकारमिश्रं समभिलषन् बौद्धो नानेकान्तं निराकुर्यात् । अत एव प्राज्ञः । ज्ञानाद्वैतवादिनां हि मते एकमेव चित्रज्ञानं ग्राहकं, तस्य चांशा ग्राह्याः, इत्येकस्यैव ग्राह्यत्वं ग्राहकत्वं चाभ्युपगच्छन् कथमनेकान्तवादं निराकुर्यात् ? यदि [२२]प्रकर्षेणाज्ञानं [न]स्यात् यत एकत्रचित्रपटीज्ञाने नीलानीलयोः परस्परविरुद्धयोरप्यविरोधेनोररीकारात् । तस्मात्ताथागतैरङ्गीकृत एवा-नेकान्तवादः ॥८॥

नैयायिकवैशेषिकयोरपि सम्प्रति प्रतिपत्तिमाह-

**चित्रमेकमनेकं च रूपं प्रामाणिकं वदन् ।**
**यौगो वैशेषिको वापि नानेकान्तं प्रतिक्षिपेत् ॥९॥**

एकं चित्ररूपं तत्रैव चानेकाकाररूपं प्रमाणोपपन्नं वदन्तावक्षपादकणादौ नानेकान्तवादं निराकुरुतः, तेषां हि मते मेचकज्ञानमेकमनेकाकारमुररीक्रियते । यतस्तेषामेवं सिद्धान्तसिद्धिः एकस्यैव चित्रपटा-देश्चलाचलरक्तारक्तावृताऽनावृताद्यनेकविरुद्धधर्मोपलम्भेऽपि दुर्लभो विरोधगन्धः । तस्मादस्मद्वद् यौगिक-वैशेषिकावप्यनेकान्तमतानुमतिं विनत्वन्तौ ॥९॥

तथा कापिलोऽपि नेकान्तवादापलापचापलपापमवाप्नुयादित्येतदेव स्तुतिकृत् प्रथयन्नाह-

**इच्छन् प्रधानं सत्त्वाद्यैर्विरुद्धैर्गुम्फितं गुणैः ।**
**साङ्ख्यः सङ्ख्यावतां मुख्यो नानेकान्तं प्रतिक्षिपेत् ॥१०॥**

सङ्ख्यावतां=प्रज्ञावतां मुख्याभिधेयनामधेयः साङ्ख्यः प्रधानं प्रकृतिं महदाद्युत्पादमूलहेतुं सत्त्वरजस्तमोभिर्गुणैरन्योन्यविरोधदुर्द्धरैरपि ग्रथितमविरुद्धतयाभिदधानः स्वात्मनो नानेकान्तमतवैमुख्यमा-ख्याति । तन्मते हि प्रकृतिरेका महादाद्यात्मिका अनेकाकारा [२३]अङ्गीक्रियते । ततः साङ्ख्योऽपि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अनेकान्तमतसम्मुख एव ॥

ननु भोः ! क एष आर्हतमतपाण्डित्यविशेषमाविष्कुर्वन् दुर्गतसौगताद्यङ्गीकृतचित्रज्ञानादिदृष्टान्तावष्टम्भेनानेकान्तवादं स्पष्टयन्नाचष्टे ? प्रथमं तावज्जीव एव नास्ति, क्व तदाश्रितश्रेयोऽश्रेयोऽनेकान्तमतस्वर्गापवर्गसर्गसङ्कथा । तथा हि- सकलेऽप्यस्मिन्नविकले जीवलोके न खलु भूतचतुष्टयव्यतिरिक्तं किमपि वस्त्वन्तरमस्ति । प्रत्यक्षप्रमाणगोचरातिक्रान्तत्वात् यद्यदेवं तत्तन्नास्ति, यथा तुरङ्गमोत्तमाङ्गशृङ्गम्। न च वाच्यम्-प्रतिप्राणिप्रसिद्धस्य चैतन्योपलम्भस्यान्यथानुपपत्त्या तद्धेतुः कश्चिदवश्यं परिकल्पनीयः, भूतचतुष्टयस्यैव तद्धेतुत्वेनाविगानात् ।

[24]अथेत्थमभिदधीथाः-कथं जडात्मकानि भूतानि तद्विलक्षणं बोधरूपं चैतन्यं जनयेयुरिति । तदपि न, न खल्वेकान्ततः कारणानुरूपमेव कार्यमुत्पद्यते, अननुरूपस्यापि दर्शनात्, यथा मद्याङ्गेभ्यो मदशक्तिः । एवं च वपूरूप्यपरिणतानि महद्भूतान्येव स्वस्वरूपजडस्वभावव्यतिरिक्तं चैतन्यमुद्बोधयन्ति । तच्च कायाकारविवर्त्तेष्ववतिष्ठते, तदभावे पुनर्भूतेष्वेव लीयते, इति न कश्चिद्भूतोद्भूतचैतन्यव्यतिरिक्तः चैतन्यहेतुतया परिकल्प्यमानः परलोकयायी जीवोऽस्ति, दृष्टहान्यदृष्टपरिकल्पनाप्रसङ्गात् । एवं च सति परलोकोऽपि प्रत्युक्त एवावगन्तव्यः, परलोकयायिनोऽभावे परलोकस्याप्यनुपपन्नत्वात् । सति हि धर्मिणि धर्माश्चिन्त्यमानाः [25]समीचीनतां परिचिन्वन्ति । किञ्च, परलोकयायिजीवसुखदुःखनिबन्धनौ धर्माधर्मावपि आकाशकुशेशयविकाशनीकाशौ । तथा तत्फलभोगभूमिप्रतिमस्वर्गनरकादिकल्पनमपि अलीकसङ्कल्पविलसितम् । विना हि धर्माधर्मौ कुतस्तत्फलभोगभूमिसम्भवः ? यच्चैवमपि एकान्तिकपुण्यपापक्षयोत्थमोक्षपक्षपातिता सा विगलितदृशश्चित्रशालोपवर्णनमिव कस्य नाम न हास्यावहा ? इति यत्किञ्चिदेतत् । अत्र प्रतिविधीयते-

योऽयमतिप्रमाणप्रवीणेन भवताऽऽत्मनिरासाय प्रत्यक्षप्रमाणगोचरातिक्रान्तत्वादिति हेतुरुपन्यस्तः स एव तावदसिद्धः, जीवस्य स्वसंवेदनप्रत्यक्षविषयत्वात् । तथा हि-सुख्यहं दुःख्यहमित्यादि स्वसम्बद्धस्वसंवेदनप्रत्यक्षेणावगम्यते जीवः । सर्वकालं निर्बाधकत्वेन, न चायं प्रत्ययो भ्रान्तः । चैतन्यान्वितदेहलक्षणपुरुषगोचरत्वेऽपि गौरोऽहं स्थूलोऽहं इत्यादिप्रत्ययः सङ्गच्छतेऽतः कृतं कायातिरिक्तात्मकल्पनाक्लेशेनेति चेत्? न, भूतानां स्वसंवेदनगोचरत्वे बहिर्मुखैव स्वसंवित्तिर्भवेत् । यथा पटोऽयमिति बहिर्मुखः प्रत्ययः, तथा सुख्यहमित्यादिरपि, यदि शरीरगोचरो भवेत्, ततोऽयं सुखीत्येवं बहिर्मुखः स्यात्, अन्तर्मुखश्चायमनुभूयते । न हि कोऽप्यहं सुखीत्यादिप्रत्ययं देहे विधत्ते, किन्तु देहातिरिक्ते कस्मिंश्चित् इत्यतः प्रतीयतेसुख्यहमित्याद्यन्तर्मुखप्रत्ययो जीवगोचर एव, न भूतगोचरः, बहिर्मुखत्वेनानवभासनात् ।

यच्चोक्तम्-वपूरूपपरिणतानि महद्भूतान्येव चैतन्यमुद्बोधयन्तीत्यादि तदप्यविकलविकलताविलसितं, यतः-यदि हि महद्भूतेभ्य एव चैतन्यमुन्मीलतीत्याद्यसङ्गतिसङ्गतमपि स्वेच्छाचलनाद्यन्यथानुपपत्तिप्रतिहतेन भवता कल्पनीयम्, तदा चैतन्यमेव जन्मान्तरादुत्पत्तिस्थनमागतं चतुर्भूतभ्रमाधायिदेहमुत्पादयेत् । भूयोभवान्तरगामुकं सत् तत् त्यजेत् । तेन चाधिष्ठितं स्वेच्छाविहारादिक्रियां कुर्यात् तद्विनिर्मुक्तं भूयो दारुवदासीत । इति आत्मजन्यमेव वपुः, न पुनरात्मा भूतसमुदयसंयोगजन्यदेहजन्य इत्यकाल्पनिकमेवादरीतुमुदारतरं विभावयामः, सचेतनस्यात्मनः कर्मावष्टब्धतयाऽन्यान्यभवभ्रमणाऽन्यान्यदेहसम्पादनयोर्घटनाघटितत्वात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

[26]अथेत्थमाचक्षीथाः-जन्मान्तरादुत्पत्तिप्रदेशमागच्छन्नात्मा प्रत्यक्षेण न लक्ष्यते । नन्वेवं वपूरूपधारणद्वारेण भूतान्यपि चैतन्यमुन्मीलयन्ति, न साक्षाल्लक्ष्यन्त इति भवत्पक्षेऽपि पक्षपातं विना सामान्यं भूतेषु वपूरूपपरिणतेष्वेव चैतन्यमुपलभामहे, नान्यदेत्यन्यथानुपपत्त्या भूतजन्यमेव चैतन्यं कल्पयामः, इति चेत् ? तर्हि कथं मृतावस्थायां भूतेषु तदवस्थेष्वेव चैतन्यं नोपलभ्यते ? वपूरूपविवर्त्तश्च कादाचित्कत्वान्यथानुपपत्त्याऽवश्यं कारणान्तरापेक्षीत्यतस्तत्सम्पादनसमर्थं जन्मान्तरायातात्मलक्षणं चैतन्यमेव मन्महे ।

अन्यच्च, आत्मा तावत्पूर्वशुभाशुभचैतन्ययोगाद् देहसम्पादनायोत्तिष्ठते, इति सौष्ठवप्रष्ठमेव, महद्भूतानि पुनः किंरूपाणि चैतन्यं कर्तुमारभेरन्, [27]चैतन्यवन्ति चैतन्यरहितानि वा ? यदि प्रथमः पक्षस्तदा विकल्पद्वयमुदयते, तेभ्यस्तच्चैतन्यं व्यतिरिक्तमव्यतिरिक्तं वा । व्यतिरिक्तं चेत् ? ततो नरशरीरेष्वेव महद्भूतेष्ववस्थितं भूतविसदृशमेव स्वहेतुमवस्थापयति, इति निजवचसैवात्मानमनुमन्यमानः किमिति कुविकल्पकल्पनेन स्वं क्लेशयसि । अथाव्यतिरिक्तम्, एवं सति सर्वमहद्भूतान्येकतां धारयन्ति, एकचैतन्याभिन्नत्वात्, निजस्वरूपवत् । अथ पृथग् स्वस्वचैतन्याभिन्नानां तेषां नायं प्रेरणावकाशः इति मन्येथाः तदपि न, यतस्तज्जन्यनरशरीरेऽपि भूतोत्पाद्यचैतन्यचतुष्टयप्रसङ्गः । अथ चत्वार्यपि एकीभूय बहवस्तन्तव इव पटं महत्तरं[28] चैतन्यं जनयेयुरिति ब्रूषे तदा तच्चैतन्यं किं भूतसंयोग उत तज्जन्यमन्यदेव किञ्चिदिति वाच्यम् । भूतसंयोगश्चेत् ? तदयुक्तं, चैतन्यानामन्योन्यसंयोगासिद्धिः, अन्यथा प्रचुरतरचैतन्यान्येकीभूय महत्तमं जनयेयुः न चैतत् दृष्टमिष्टं वा । अथ भूतोत्पाद्यमन्यदेव किञ्चिदिति । एतस्मिन्नपि किं तेषामन्वयोऽस्ति न वा ? अस्ति चेत् तदा पूर्ववद्भूतजन्यचैतन्यचतुष्टयतापत्तिः, अथ नास्ति तदप्यसङ्गतम्, निरन्वयोत्पत्तेर्युक्तिरिक्तत्वात् । तस्मान्न सचैतन्यानि चैतन्यं जनयेयुर्भूतानि, न च तद्रहितानि तेषामत्यन्तविसदृशत्वेन चैतन्योत्पत्तिविरुद्धत्वात् । अन्यथा सिकतादिभ्योऽपि तैलमुत्पद्येत ।

अन्यच्च- भूतनिचयमात्रजन्यं चैतन्यं तत्परिणतिविशेषजन्यं वा स्यात् ? न तावत्प्रथमः पक्षः क्षोदक्षमः, अवनिजीवनपवनदहनयोजनेऽपि चैतन्यानुपलम्भात् । द्वैतीयीकपक्षे कः पुनः परिणामविशेष इति पृच्छामः । वपूरूपपरिणतिरिति चेत् ? ततः सा सर्वकालं कस्मान्न भवति ? किमपि कारणान्तरमाश्रित्योत्पद्यते इति चेत् ? तदा तत्कारणान्तरं जन्मान्तरागतात्मचैतन्यमिति वितर्कयामः, तस्यैव वपूरूपपरिणतिजन्यचैतन्यानुरूपोपादानकारणत्वात् । तदभावे वपूरूपपरिणतौ सत्यामपि मृतदशायां भूतसद्भावेन चलनादिक्रियाऽनुपलम्भात् । तन्न वपूरूपपरिणतिजन्यं चैतन्यम्, किन्तु सैव तज्जन्येति क्षोदक्षमं लक्षयामः ।

अथ न प्रत्यक्षादन्यत् प्रमाणम्, न च तेन गमनागमनादिकं भवान्तराच्चैतन्यस्योपलभामहे । तेन तल्लक्षाण्येव भूतानि तद्धेतुतया निर्दिशामः इति तदप्यसत् । यतः केवलप्रत्यक्षाश्रयेण देशकालस्वभावविप्रकृष्टानां मेरुभवत्पितामहपरमाण्वादीनामप्यभावप्रसङ्गः, तेन च भवदादीनामप्यनुत्पत्तिप्रसङ्गः । इत्यतो बलात्कारेणैव अनुमानादीनि प्रमाणानि प्रतिपत्तव्यानि, सन्ति चानुमानानि अनेकशः । तथा हि-अस्ति कश्चिद्देहे तदतिरिक्तश्चेतनः, सुख्यहं दुःख्यहमित्याद्यनुभवस्यान्यथाऽनुपपत्तेः । यदि च न स्यात्, तदा सुखाद्यनुभवोऽपि न स्यात्, यथा मृतशरीरे । तथा हि हिताहितप्राप्तिपरिहारचेष्टा प्रयत्नपूर्विका विशिष्टक्रियात्वात्, रथक्रियावत् । यश्चास्य प्रयत्नस्य कर्त्ता सोऽयमस्मत्सम्मतश्चेतनः । न च निरुक्तयुक्तिप्रतिहतेन भवता इहभव एव देहातिरिक्तः कश्चिदस्ति न त्वमुष्मिन्निति विप्रतिपत्तव्यं, जन्मान्तरागामुकस्यैवास्य प्रमाणप्रतिष्ठितत्वात् । तद्यथा-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदहर्जातबालकस्याद्यस्तन्याभिलाषः पूर्वाभिलाषपूर्वकः अभिलाषत्वात्, द्वितीयदिवसादिस्तन्याभिलाषवत् । तदिदमनुमानमाद्यस्तन्याभिलाषान्तरपूर्वकत्वमनुमापयदर्थापत्त्या परलोकागामिजीवमाक्षिपति, तज्जन्मन्यभिलाषान्तराभावात् ।

किञ्च, यदुक्तम्-एतावता धर्माधर्मावपि नभोऽम्भोजनिभौ मन्तव्यौ इति तदप्यपाकृतम् । तदभावे सुखदुःखयोर्निर्हेतुकत्वात् अनुत्पाद एव स्यात् । स च प्रत्यक्षविरुद्धः तथा हि-मनुजत्वे समानेऽपि दृश्यन्ते केचन स्वामित्वमनुभवन्तोऽपरे पुनस्तत्प्रेष्यभावमाबिभ्राणाः । एके च लक्षम्भरयोऽन्ये तु स्वोदरदरीपूरणेऽप्यनिपुणाः । एके देवा इव निरन्तरसरसविलाससुखशालिनः, इतरे नारका इवोन्निद्रदुःखविद्राणचित्तवृत्तयः, इत्यतोऽनुभूयमानसुखदुःखनिबन्धनौ धर्माधर्मौ स्वीकर्त्तव्यौ । तदङ्गीकरणे च विशिष्टयोस्तत्फलयोर्भोगभूमी स्वर्गनरकावपि प्रतिपत्तव्यौ, अन्यथाऽर्धजरतीयन्यायप्रसङ्गः स्यात् ।

एवं च पुण्यपापकर्मक्षयोत्थमोक्षपक्षोक्तदूषणमप्यननुगुणं गणनीयम् । न च वाच्यम्, यदुत बन्धः कर्मजीवसंयोगलक्षणः स आदिमान् आदिरहितो वा । तत्र यदि प्रथमो विकल्पः, ततो विकल्पत्रयप्रसङ्गः । किं पूर्वमात्मनः प्रसूतिः पश्चात् कर्मणः ? यदि वा पूर्वं कर्मणः पश्चादात्मनः ? अथवा युगपदुभयस्येति ? किञ्चातः सर्वत्रापि दोषः तथाहि-न तावदात्मनः [२९]प्राक्प्रसूतिः निर्हेतुकत्वात्, व्योमकुसुमवत् । नापि कर्मणः प्राक्प्रसूतिः, कर्तुरभावात्, न चाकृतं कर्म भवति । युगपत्प्रसूतिरप्यसङ्गता, कारणाभावात् । न चानादिमत्यात्मनि बन्धो घटामटाट्यते, बन्धकारणाभावाद् गगनस्येव । इत्थं चैतदङ्गीकर्त्तव्यम्, अन्यथा मुक्तस्यापि बन्धप्रसङ्गो विशेषाभावात्, तथा च सति नित्यमुक्तत्वात् मोक्षानुष्ठानवैयर्थ्यमिति । अथ द्वितीयः पक्षस्तर्हि नात्मकर्मवियोगो भवेदनादित्वात्, आत्माकाशसंयोगवत्, इति मोक्षानुपपत्तिरिति, यतो जीवोऽनादिनिधनः, सत्त्वे सत्यहेतुकत्वात् । कर्मापि प्रवाहतोऽनादिमत् । ततो जीवकर्मणोरनादिमानेव संयोगो, धर्मास्तिकायाकाशसंयोगवदिति प्रथमपक्षोक्तदूषणानवकाशः ।

योऽपि द्वितीयपक्षेऽभिहितोऽनादित्वात् संयोगस्य वियोगाभाव इति सोऽप्यसमीचीनः, तथाऽदर्शनात् । तथा च, काञ्चनोपलयोः संयोगोऽनादिसन्ततिगतोऽपि क्षारमृत्पुटपाकादिद्रव्यसंयोगोपायतो विघटमानो दृष्टस्तथा जीवकर्मणोरपि ज्ञानदर्शनचारित्रोपायतो वियोग इति न कश्चिद् दोषः ।

अथ यद्यनादि सर्वं कर्म ततस्तस्य [३०]जीवकृतकत्वानुपपत्तिर्जीवकृतकत्वेनानादित्वविरोधात्, तदसम्यग्, वस्तुगत्यनवबोधात् । तथा हि-जीवेन तथा[३१] मिथ्यादर्शनादिसव्यपेक्षेण तथा तदुपादीयते कर्म यथा तेन जीवेन कृतमुच्यते । तच्च तथाप्रवाहापेक्षया चिन्त्यमानमादिविकलमित्यनादि । निदर्शनं चात्र कालः, यथा हि यावान् अतीतकालस्तेनाशेषेण वर्त्तमानत्वनुभूतम्, अथ चासौ प्रवाहतोऽनादिः, एवं कर्मापीति ।

यदुक्तम्-मुक्तस्यापि बन्धप्रसङ्गो विशेषाभावादिति, तदप्ययुक्तम्, विशेषाभावासिद्धेः । तथा हि-संसारी जीवः कषायादियुक्तः, [३२]कषाययुक्तश्च कर्मणो योग्यान् पुद्गलानादत्ते इति तस्य कर्मबन्धोपपत्तिः, मुक्तश्च कषायादिपरिणामविकलः, शुक्लध्यानमाहात्म्यतस्तेषां समूलमुन्मूलितत्वात् । ततो मुक्त्यवस्थायां कर्मबन्धाप्रसङ्गः । न च वाच्यम्, एवं सति तर्हि निरन्तरमुक्तिगमनतो भव्यानामुच्छेदप्रसङ्गोऽनन्तानन्तसङ्ख्योपेतत्वात् । इह यद् यदनन्तसङ्ख्योपेतं तत् तत्प्रतिसमयमेकद्वित्र्यादिसङ्ख्ययापगच्छदपि न

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कदाचन निर्लेपीभवति । यथा अनागतकालस्तथा चानन्तानन्तसङ्ख्योपेता भव्या इत्यनुच्छेदो भव्यानाम् ॥१०॥

एवं सत्प्रमाणप्रतिष्ठितेष्वात्मतत्त्वतदाश्रितश्रेयोऽश्रेयोऽनेकान्तमतस्वर्गापवर्गादिषु कुग्रहग्रहिलतयैवाप्रतिपद्यमानं चार्वाकमवज्ञोपहतमेव कुर्वाणः स्तुतिकृदाह-

**विमतिः सम्मतिर्वापि चार्वाकस्य न मृग्यते ।**
**परलोकात्ममोक्षेषु यस्य मुह्यति शेमुषी ॥११॥**

तस्य सर्वापलापलोलुपस्य चार्वाकस्य विप्रतिपत्तिः सम्प्रतिपत्तिर्वा न मृग्यते=न विलोक्यते यस्य परभवभृदपुनर्भवेषु सर्वसम्मतेष्वपि मतिर्मुह्यति । मीमांसामांसलमतिर्मीमांसकोऽपि सर्वज्ञापलापं प्रलपन् संशयज्ञानमेकमनेकाकारं प्रतिजानानो नानेकान्तं प्रतिक्षिपति । नास्तिकस्तु महापापी तत्कथयाप्यलं । कलाकौशलशालिनाम् ॥११॥

ननु ताथागतादीनामुपपत्त्या साम्मत्यं चार्वाकस्य वराकस्योपेक्षामुपक्षिप्तवान् तदत्र मीमांसामांसलमतेर्मीमांसकस्य किमिति कामपि चर्चां नाकरोदाचार्यः । उच्यते-समस्तमतविक्षेपेण स्वयमेव प्रकारान्तरेण अनेकान्तमतं प्रतिष्ठमानं तं प्रति प्रतिपत्त्युपपत्तिः पिष्टमेव पिनष्टीति नास्ति पर्यनुयोगावसरः । ततः सिद्धं सर्वमतसम्मतमनेकान्तमतम् । यत एव चानेकान्तात्मकं वस्तूपपत्तिक्षमं ततस्तत् सत्त्वमप्यनेकान्तात्मकमेव इति उत्पादयन् (उपपादयन्) अधुना सर्वमतप्रपन्नानेकान्तयुक्त्या वस्तुनः परमार्थसत्त्वमाह-

**तेनोत्पादव्ययस्थेमसम्भिन्नं गोरसादिवत् ।**
**त्वदुपज्ञं कृतधियः प्रपन्ना वस्तु वस्तु सत् ॥१॥**

हे भगवन् ! तेन कारणेन कृतधियः कृतिनस्त्वप्ररूपितमेव वस्तु वस्तुवृत्त्या सत् पारमार्थिकमितियावत् प्रपन्ना अङ्गीकृतवन्तः । कथम्भूतं वस्तु इत्याह-उत्पादव्ययस्थेमसम्भिन्नं उत्पादविनाशस्थितिस्वभावम् को भाव उत्पादादयः समुदिताः सत्त्वं गमयन्ति ? सत एव तद्भावात्, न हि सर्वथाप्यसतस्तुरङ्गशृङ्गादेः केनचिदप्याकारेणानुपाख्यायमानश्चोत्पादादयो भवितुमर्हन्ति । तस्मादुत्पादादिमत्त्वं सत्त्वम् ।

यदुवाच वाचकमुख्यः- [33]**'उत्पादव्ययस्थेमयुक्तं वस्तु सत्'** । पारमर्षमपि **'उप्पन्नेइ वा विगमेइ वा धुवेइ वा'** इति ।' तत्र द्रव्यं पर्यायात्मकमिति भणनेन द्रव्यैकान्तपर्यायैकान्तपरिकल्पितविषयव्युदासः । आत्मग्रहणेन चात्यन्तव्यतिरिक्तद्रव्यपर्यायवादिकणादयौगाभ्युपगतवस्तुनिरासः । यतः **श्रीसिद्धसेनः**-

**दोहिं वि नएहिं नीअं सत्थमुलूएण तह वि मिच्छत्तम् ।**
**जं सविसयपहाणत्तणेण अन्नुन्ननिरविखम्** ॥ इति ।

अथेत्थमाचक्षीथाः-न द्रव्यं पर्यायात्मकं परमार्थसत्, एकान्तनित्यानित्यवस्तुवदनर्थक्रियाकारित्वात् । तेन च किम् ? यत अर्थक्रियार्थी सर्वोऽपि विपश्चित्, एतच्चार्थक्रियाकारित्वं नित्यानित्यात्मकेऽपि न [34]घट्टकोटिसण्टङ्कमारोहति । यतः-

**प्रत्येकं यो भवेद्दोषो द्वयोर्भावे कथं न सः ।**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मादुत्पादव्ययस्थेममहिमाऽनर्थक्रियाकारित्वेन न वस्तुनि वास्तवी इति चेत् ? न, पूर्वोत्तराकारपरिहारस्वीकारस्थितिलक्षणपरिणामेनास्य नित्यानित्यात्मकस्य वस्तुनोऽर्थक्रियोपपत्तेः । यतोऽस्मन्मते न कूटस्थनित्यस्वरूपद्रव्यरूपं वस्तु, नाप्येकान्तानित्यपर्यायरूपं, नोभयरूपं वस्तु, येन पक्षद्वयभाविदोषावकाशशङ्का, किन्तु स्थित्युत्पादव्ययात्मकं शबलं जात्यान्तरमेव वस्तु । तेन तत्सहकारिसन्निधाने क्रमेण [35]समकालं वा तां तामर्थक्रियां कुर्वन् सहकारिकृतामुपकारपरम्परामुपजीवच्च जैनमतानुसारिभिरनुश्रियते । ततः सिद्धमुत्पत्तिव्ययध्रौव्ययुक्तमर्थक्रियाकारि वस्तु ।

ननु कथं वस्तुन्येकसामायिकमन्योन्यविरुद्धं परिकल्पयितुं न्याय्यमित्याशङ्कायां वदन्ति सूरयः- गोरसादिवदिति । यथा गोरसे स्थायिनि [36]पूर्वदुग्धपरिणामो विनाशं गतः उत्तरदधिभावो उत्पन्न इति विनाशोत्पादौ सम्भवन्तौ प्रमाणबलेनोपलब्धौ, तौ कथमपह्नोतुं पार्येते ? यदुक्तम्-

**पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः ।**
**अगोरसव्रतो नोभे तस्माद् वस्तु त्रयात्मकम् ॥१॥**
**घटमौलिसुवर्णार्थी नाशोत्पत्तिस्थितिष्वलम् ।**
**शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम् ॥२॥**

यथा चैकस्या अङ्गुलेः स्थायिन्याः पूर्वस्थितसरलभावाभावो वक्रतासम्भवश्च । एवं त्रिभुवनभवनोदरविवरवर्त्तिपदार्थसार्थे उत्पादव्ययध्रौव्यभावं पश्यन्तु शेमुषीमुख्याः । ततः सिद्धं त्रयात्मकं वस्तुतत्त्वम् ।

तथा च प्रयोगः-[37]विवादास्पदीभूतं वस्तु नित्यानित्यसत्त्वासत्त्वसामान्यविशेषाभिलाप्यानभिलाप्याद्यात्मकं तथैवास्खलत्प्रत्ययेन प्रतीयमानत्वात् । यद्यथैवास्खलत्प्रत्ययेन [38]प्रतीयते तत्तथैवाभ्युपगन्तव्यम् । यथा घटो घटरूपतया प्रतीयमानो घट एव न पटः । तथैव चास्खलत्प्रत्ययेन प्रतीयमानं वस्तु तस्मान्नित्यानित्याद्यात्मकम् । न चात्र स्वरूपासिद्धो हेतुस्तथैवास्खलत्प्रत्ययेन प्रतीयमानत्वस्य सर्वत्र वस्तुनि तिष्ठमानत्वात् । न हि स्वरूपपररूपाभ्यां भावाभावात्मकत्वेन द्रव्यपर्यायरूपादिभिर्नित्यानित्याद्यात्मकत्वेन सर्वस्मिन् पदार्थे प्रतिभासः कस्यचिदसिद्धः । तत एव न सन्दिग्धासिद्धोऽपि न खल्वबाधरूपतया प्रतीयमानस्य वस्तुनः सन्दिग्धत्वं नाम । नापि विरुद्धः, विरुद्धार्थसंसाधकत्वाभावात् । न हि एकान्तेऽपि तथैवास्खलत्प्रत्ययप्रतीयमानत्वमास्ते, येन विरुद्धः स्यात् । नापि पक्षस्य प्रत्यक्षादिबाधा, येन [39]हेतोरकिञ्चित्करत्वम् । नापि दृष्टान्तस्य साध्यविकलता साधनविकलता वा । न खलु घटे नित्यानित्याद्यात्मकत्वं तथैवास्खलत्प्रत्ययप्रतीयमानत्वं [40]चासिद्धम् । तस्मादनवद्यं प्रयोगयोगमुपश्रुत्य किमित्यनेकान्तो नानुमन्यते ? ॥११॥

**इति अष्टमप्रकाशवृत्तिः सम्पूर्णा ॥ शुभं भवतु ॥**

**पादटीप :**

१. वेत्याशङ्का पाठा० ।

२. विनाश एव स्यात् पाठा० ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३. च नित्यैकस्वभावक्षतिः इति पाठो समीचीनो भाति ।

४. परिणामानित्यत्वं । पाठा०

५. सर्वथा नित्यवत् । पाठा०

६. त्रैलोक्यमेव क्षणवर्त्ति । पाठा०

७. वादृष्ट । पाठा०

८. तथा येन रूपेण भेदस्तेनाभेदो येन चाभेदस्तेन भेदोऽपि स्यात्, इति सङ्करः । पाठा०

९. नैकान्तरूपतासिद्धिः । पाठा०

१०. अनेकान्तबाधकं । पाठा०

११. परस्परविरुद्धधर्मत्वात् । पाठा०

१२. चासत्त्वस्यैकस्मिन् । पाठा०

१३. सारूप्यात्तद्गतो । पाठा०

१४. विरोधो बाधक इत्यप्यसत्यम् । पाठा०

१५. अथानयोः । पाठा०

१६. निर्बाधं प्रत्यक्षबुद्धौ । निर्बाधप्रत्यक्षं बुद्धौ ॥ पाठा०

१७. अभ्युपगतत्वात् । पाठा०

१८. चेतनं तु । पाठा०

१९. न्यायान्तरान्निराकर्त्तव्यः । पाठा०

२०. साध्यान्तरं प्रत्यपि, उतान्यथेति । पाठा०

२१. भेदाभेदयोरेकाधिकरणत्वेन प्रत्यक्षबुद्धौ प्रतिभासनात् । पाठा०

२२. प्रकर्षेणाङ्गो न स्यात् । पाठा०

२३. अभ्युपपद्यते (अभ्युपगम्यते) । पाठा०

२४. अथेत्थमभिदधीथाः । पाठा०

२५. समीचीनतामुपचिन्वन्ति । पाठा०

२६. अथेत्थमाचक्षीथाः- । पाठा०

२७. चैतन्यवन्ति तद्विनाकृतानि वा । पाठा०

२८. महत्तरचैतन्यमुत्पादयेयुरिति । पाठा०

२९. पूर्वं प्रसूतिः । पाठा०

३०. जीवकृतत्वानुपपत्तिजीवकृतत्वेऽनादित्वविरोधात् । पाठा०

३१. तथा तथा । पाठा०

३२. तद्युक्तश्च । पाठा०

Jain Education International For Personal & Private Use Only www.jainelibrary.org

३३. उत्पादव्ययध्रौव्ययुक्तं । पाठा०

३४. घटासण्टङ्कमारोहति । पाठा०

३५. युगपद्वा । पाठा०

३६. पूर्वदुग्धपरिणामविनाशोत्तरदधिभावोत्पादौ सम्भवन्तौ । पाठा०

३७. विवादास्पदं । पाठा०

३८. प्रतीयमानं तत्तथैव दृष्टम् । पाठा०

३९. हेतोरकिञ्चित्करत्वं स्यात् । पाठा०

४०. वाऽसिद्धम् । पाठा०

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# HERITAGE OF INDIA

A. U. PATEL

Dr. Hari, Prof. Thakar, Director of the Institute and invited Guests.

It gives me great pleasure to be in your midst this morning and be part of this august gathering. Let me, at the outset, congratulate संस्कृतभारती for the commendable activities undertaken by it for the spread of Sanskrit language and for the efforts made to make the people aware of the rich heritage that our country possesses, and which, unfortunately, not many of us are aware of.

India is a cradle of human civilization and the achievements, of ancient and medieval India in science, literature, arts, astronomy and other fields over thousands of years have inspired creative thoughts of nations far and wide. Analysis of the history and culture of India and India's contribution to world thought began at the end of the 18th century, when Europe once again 'discovered' India and since then a variety of schools have grown up, in Indology. Art, architecture, music, dance, literature and science and a million other things exist, in one seamless whole in Indian culture. It is a mosaic of various strands, a rainbow of the human spirit, never displayed anywhere else in the world.

The French philosopher Laplace, during Napoleon's time, wrote : "It is India that gave us the ingenious method of expressing all numbers by ten symbols, each symbol receiving a value position as well as absolute value...We shall appreciate the grandeur of this achievement when we remember that it escaped the genius of Archimedes and Apollonius, two of the greatest men produced by antiquity. The zero, shunya in Sanskrit, was used in 2000 B. C.

In his introduction to 'A Cultural History of India' A. L. Basham observes: "No land on earth has such a long cultural continuity as India, since, though there were more ancient civilizations, they were virtually forgotten by the inhabitants of those lands or were overlaid by new intrusive cultures. In respect of length of continuous tradition China comes second, to India and Greece makes a poor third." The cultural quality and temper of a nation can be gauged to a great extent by its literature and in India the stage was set by the great literature produced in Sanskrit. Indian culture has an organic unity, and Sanskrit language and its literature have been mainly responsible for building up and maintaining this

Jain Education International For Personal & Private Use Only www.jainelibrary.org

unity. Dr. Sunit Kumar Chatterjee, the doyen among leaders of Indian literature, has said : "The Ramayan a and the Mahabharata have moulded the life and literature of India and constitute the greatest literary heritage of the country. The cultural unity of India, ancient, medieval, and modern has been primarily nurtured through them." The works of great writers in Sanskrit have inspired writers in modern Indian languages, in the last millenium. Sanskrit literature is about 3000 years old, and its role in maintaining the unity of culture throughout the sub-continent can be seen from the various periods of its literature including the Vedic and the classical. Panini's great grammar called the *Ashtadyaya* helped in stabilising the norms and principles of the language some 2500 years ago. The great seers, visionaries and philosophers like Sankara, Ramanuj and Madhwa were scholars of Sanskrit and it was not for nothing, that the German writer Goethe danced in ecstasy hailing Kalidasa's *Shakuntal* as the meeting place of the earth and the heaven. It was another German Max Muller who studied Sanskrit scriptures and works and marvelled at the grandeur of Sanskrit and the beauty of Vedas; many Western scholars, such as Thoroeu and Emerson have been enamoured of literature in Sanskrit and have praised it, in laudatory terms. It was Emerson who remarked : "Every morning I bathe my intellect in the brilliance of the Bhagvad Gita." Modern novelist Aldous Huxley wrote a commentary on the timeless message of Bhagavad Gita and called it 'song celestial.' Thus Sanskrit has been a repository of culture, and its study will help people in appreciating its richness and immense value, in the present time. Let the vision of the *Brihadaranyaka* (બૃહદારણ્યક) *Upanishad* prevail when the cultural values are being swept under the carpet. It says Da - दा - Give, दमयत - control ourselves and दयध्वम् - be compassionate and sympathise. Giving and sharing, self-control and compassion are the key words that should guide us as we begin our quest for the Holy Grail or the EL DORADO, the eternal happiness.

Thus India's contribution to the world has been monumental and westerners have come to realise it but unfortunately many in the country are blissfully ignorant about it, and Sanskrit Bharati should intiate programmes to usher, in a renaissance of Sanskrit language and literature.

Let these be an interplay between East and West, for such an interplay holds out the promise of an open society, in which man, in all his diversity, would be 'out of place nowhere and at home anywhere.' This interface will prove Kipling wrong who said : "East is east and West is west and twain shall never meet."

I thank the organizers for inviting me and giving me an opportunity to present some stray thoughts on a topic which so vitally concerns us all.

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# REVIEW

**M. A. Dhaky : *The Indian Temple Traceries*, American Institute Of Indian Studies, D. K. Print World (P) Limited, New Delhi-2005, pp. 490 including 348 photo-illustrations and 55 line drawings. Price Rs. 3,600/-.**

The *jāla*/grille, in ancient and medieval Indian architectural studies, did not attract attention of the archaeologists and art historians, though in the domain of Islamic architecture, the screens for certain were subjected to deeper analysis, particularly in unravelling the geometry that underlay their construction. Now, the fullfledged work appearing in the rubric above on the subject by M. A. Dhaky opens up a new vista to the understanding and evaluation of the functional, creative, and aesthetic aspects of the *jāla* in the context of Indian temples.

The well-decorated as well as simply but elegantly designed *jālas* in the ancient and medievel Indian architecture are in this Volume studied in the light of southern Indian *vāstu* texts on Dravidian architecture. The texts from north India, technical or otherwise, do notice *jāla* but give no particulars as to its forms, features, types and varieties. Hence the categorization of types and nomenclature *et cetera* are based on the Damila / Tamiḻ tradition. However, it may sound paradoxical that the *jāla* is virtually absent in the buildings of the Pallavas, Pāṇḍyas and even Cōḻas (early phrase) in the Tamiḻ country till one comes to the 12th century A. D. While the *jāla* played a major rôle in the buildings of the Calukya, Rāṣṭrakūṭa, Cālukya and Hoysaḷa periods in Karnataka and to some extent in the temples of Andhra deśa, particularly of the Kākatīya period, in north India it is available from the earlier times, in the Buddhist caves to be precise and, next in the Brahmanical and Buddhist structural temples. There, however, the earlier indigenous types began to be replaced by the Islamic geometric types from the late 16th Century onwards.

The textual portion on the subject of *jāla* is here documented thoroughly and from this the author has noted some 17 types of *jālas*. The categorization of types under Auspicious, Geometric, Architectural, Vegetal, Figurative, Composite, Sakhaṇḍaka and Unclassified are defined as well as treated with insight, dwelling as it also does on their formal aspects, origins and development. The *svastika*,

Jain Education International For Personal & Private Use Only www.jainelibrary.org

the *nandyāvarta,* the *haṁsa,* the *śiṁha,* and the *cakravyūha* under Auspicious class, and under geometric the *Turyasra* / the *Caturasraka*, the *Sarvatobhadra*, the *Sakarṇa*, the *Vardhamāna*, and the *Ṛjukriya*, and the *Stambha* under architectural and the *Puṣpakhaṇḍa,* the *Latā,* and the *Gomūtra* under Vegetal, and, in the Figuritive, the *Nāgabhandha*, the *Gulika*, and the Composite *jālas* are classified. The *Sakhaṇḍaka jālaka* is composed of compartments / boxes set in a grid pattern. In the early medieval period, it had wide distribution in Karnataka and Andhra Pradesh; and it became a highly favoured component in the buildings of western India from the 11th century A. D. The author traces how it was adopted in the Islamic architecture of the mosques and *maqbarās* of the Sultanate period (*c* : early 15th to early 16th century A. D.) and how it was transformed in the Mughal period at Gwalior, Fatehpur Sikri and Agra. On the aesthetics of later Islamic *jāla,* Dhaky comments : "The designs now worked become more and more finicky, more veil-like and consequently accompanied with loss of substantiality but gain on the score of delicate elegance".

The type *Bahurandhra* (many-holed) is ubiquitous in the later Mughal and Rājput architecture that differed from the traditional Indian types as documented in a single work, the *Viśvakarmā-vāstuśāstra,* a later southern work on architecture of about 16th or early 17th century.

Besides comparing the Indian Śāstric *jāla* types and Islamic screens, the author also brings into the compass of study the Gothic traceries. Though far apart in concept, form, and purpose from the grille traditions of Medieval India, Dhaky here considers the traceries in Gothic style in detail for comparing and contrasting the visuality of its creations with those of the ancient and medieval Indian (Brahmano–Buddhist–Jaina) as also those of the Pan–Islamic architectural system. The Volume represents a highly rewarding study as it unfolds the evolution of the *jāla* form, the *jāla's* architectural setting and its later echoes in the British period.

The rich information and insightful text of the Volume is accompanied by profusely illustrated diagrams and photoplates of good quality with commentary. In the art historical methodology, this Volume by Dhaky stands out as a seminal, substantial, and a unique contribution to the many perspectives of the Indian art history set in global art context as rightly pointed out by Frederick Asher in his erudite Forward.

**B. Rajendra Prasad**
16-III-642, Ramamurthy Nagar,
2nd Cross road,
Nellore-524 003.
(Andhra Pradesh)

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Jain Education International For Personal & Private Use Only www.jainelibrary.org

## Trade terms for L. D. Series Publications :

| | | |
|---|---|---|
| (1) | Gross purchase exceeding Rs. 5000/- or on purchase of 20 copies of any title or 25 copies of assorted title at a time. | 30% |
| (2) | Book-Sellers and the Institutions on any purchase | 30% |
| (3) | Gross purchase exceeding Rs. 10,000/- or on the purchase of one copy of all available titles. | 40% |
| (4) | Packing and forwarding free by rail for order at a time exceeding Rs. 10,000/- | |

(5) Research Journal–"Sambodhi"

(a) Price (Excluding Postage) per vol. Rs. 150/-

(b) Price (Excluding Postage) per back vol. up to XXI Rs. 100/-

On Purchase of 5 copies or more of the same volume 20%
On Purchase of 10 copies or more of the same volume 25%

Our gerneral practice is to send the proforma invoice on inquiry for our publications and dispatch the books on receiving the payment by D. D. in favour of the Institution.

### • Distributors •

1 **Ahmedabad**
**Saraswati Putstak Bhandar,**
Hathi Khana, Ratan Pole,
Ahmedabad - 380 001.
Phone : 25356692

2. **Delhi**
**Motilal Banarasi Dass**
41/U-S, Banglow Road,
Jawahar Nagar,
Delhi-110 007,
Phone : (011) 23858335
23854826

3. **Chennai**
**Motilal Banarasi Dass**
120, Royapetth High Road,
Mylapore, Chennai-600 004.
Phone : (044) 24982315

4. **Mumbai**
**Hindi Granth Karyalay**
Hira Baug, C. P. Tank,
Mumbai-400 004.
Phone : (022) 23516583
23513526

5. **Varanasi**
**Motilal Banarasi Dass**
Chowk, Varanasi-221 001
Phone : 352331
Phone : (0542) 2412131
3095108

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# L. D. Series : Latest Publications

| | | |
|---|---|---|
| 128 | **Śāstravārtā Samuccaya of Acārya Haribhadra Suri with Hindi translation** Notes & Introduction by Dr. K.K.Dixit P.P. 272 (2001) | 185 |
| 129 | **Temple of Mahāvira Osiyāji -** Monograph by Dr. R.J.Vasavada P.P. 30 + Plates 61 (2001) | 360 |
| 130 | **Bhagwaticurni** - Ed. Pt. Rupendra kumar Pagariya P.P. 120 (2002) | 135 |
| 131 | **Abhidhā** - Dr. Tapasvi Nandi P.P. 84 (2002) | 120 |
| 132 | **A Lover of Light amoung Luminaries : Dilip Kumar Roy** Dr. Amrita Paresh Patel P.P. 256 (2002) | 220 |
| 133 | **Sudansaṇā-cariyaṁ** Dr. Saloni Joshi P.P. 8 + 110 (2002) | 180 |
| 134 | **Śivāditya's Saptapadārthī with a commentary by** Jinavardhana Sūri Ed. Dr. J. S. Jetly P.P. 24 + 96 (2003) | 110 |
| 135 | **Pāṇiniya Vyākaraṇa - Tantra, Artha aur Sambhāṣana Sandarbha** Dr. V. M. Bhatt P.P. 88 (2003) | 65 |
| 136 | **Kurmaśatakadvayam,** Translation with select Glossary - Dr. V. M. Kulkarni Introduction by Dr. Devangana Desai P.P. 85 (2003) | 100 |
| 137 | **Catalogue of Sanskrit and Prakrit Manuscripts Vol. V** | 900 |
| 138 | **Catalogue of Sanskrit and Prakrit Manuscripts Vol. VI** | 700 |
| 139 | **Mahavira's Words** Translation from the German with much added material by W.Boll'ee and J. Soni | 600 |
| 140 | **Vyākarṇa Mahābhāṣya Of Bāgavad Patanjali** Gujarati Translation with Critical Notes by Dr. P.R.Vora P.P. 6 + 58 + 652 (2004) | 600 |
| 141. | **SAHṚDAYĀLOKA** by Dr. T. S. Nandi vol.1 part-1 pp. 600 | 650 |
| 142. | **SAHṚDAYĀLOKA** by Dr. T. S. Nandi vol.1 part-2 pp. 640 | 650 |
| 143. | **SAHṚDAYĀLOKA** by Dr. T. S. Nandi vol.1 part-3 pp. 676 | 700 |

## Our Forthcoming Publications

- Haribhadra Sūri's Yogaśataka
- Sambodhi Vol. XXIX

Jain Education International For Personal & Private Use Only www.jainelibrary.org